555

ह्रीका, स्त्री, (ह्री + "ह्रियो रश्च लो वा ।" उणा० ३ । ४८ । इति कन् । टाप् । ) त्रासः । इत्युणादिकोषः ॥ लज्जा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

ह्रीकुः, त्रि, (ह्री + "ह्रियः कुक् रश्च लो वा ।" उणा० ३ । ८५ । इति कुक् । ) लज्जितः । सलज्जः । इत्युणादिकोषः ॥

ह्रीकुः, पुं, (ह्री + कुक् ।) जतुकः । त्रपुः । इत्युणादिकोषः ॥

ह्रीच्छ, लज्जे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) रेफयुक्तादिचतुर्थस्वरी । ह्रीच्छति वधूः । इति दुर्गादासः ॥

ह्रीजितः, त्रि, ( ह्रिया जितः ।) लज्जाशीलः । इति जटाधरः ॥

ह्रीणः, } त्रि, ( ह्री + क्तः । तस्य वा नः ।)
ह्रीतः } लज्जितः । इत्यमरः । ३ । १ । ९१ ॥
( यथा, महाभारते । ३ । २३ । ८ ।
"हा नाथ ! हा धर्म्म इति ब्रुवाणा
ह्रीताश्च सर्व्वेऽश्रुमुखाश्च राजन् ! ॥"
यथा च नैषधे । ३ । ६७ ।
"इतीरिता पत्ररथेन तेन
ह्रीणा च हृष्टा च बभाण भैमी ॥")

ह्रीवेरं, क्ली, ( ह्रिये लज्जायै वेरमङ्गमस्य । क्षुद्रत्वात् । ) वालकम् । इत्यमरः ।२।४।१२२॥ वाला इति भाषा । अस्य गुणाः राजवल्लभे । "ह्रीवेरं छर्द्दिहृल्लासतृष्णातीसारनाशनम् ।" अन्यत् ह्रीवेरशब्दे द्रष्टव्यम् ॥

ह्रीवेलं, } क्ली, (ह्रीवेर + पृषोदरादित्वात् रस्य
ह्रीवेलकं, } लः । पक्षे ह्रीवेल + स्वार्थे कन् ।) ह्रीवेरम् । इत्यमरटीकायां भरतः ॥

ह्रुड, } ऋ ङ गतौ । इति कविकल्पद्रुमः ॥
ह्रूड, } (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अजह्रूडत् । अजुह्रोडत् । ङ, ह्रूडते । ह्रोडते । इति दुर्गादासः ॥

ह्रेप, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।). ऋ, अजिह्रेपत् । ङ, ह्रेपते जिह्रेपे । इति दुर्गादासः ॥

ह्रेष, ऋ ङ सर्पणे । अश्वस्वने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अश्वशब्दे अक०-सर्पणे सक०-सेट् ।) रेफयुक्ताद्यः । ऋ, अजिह्रेषत् । ङ, ह्रेषते जिह्रेषे । ङ, हेषृ च स्वनेऽश्वानाम् । ङ, हेषते घोटकः जिहेषे । ऋ, अजिहेषत् । चकारात् ह्रेषृ ङ च । मधुरमधुपं ह्रेषन्ते ।

इति गणकृतानित्यत्वात् । वस्तुतस्तु पचादित्वादनि ह्रेषा इवाचरन्तीति क्वौ साध्यम् । इति दुर्गादासः ॥

ह्रेषा, स्त्री, (ह्रेष + भावे अः ।) अश्वानां कण्ठाद्विनिर्गतशब्दः । इत्यमरः । २ । ८ । ४७ ॥

ह्रौड, ऋ ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अजुह्रौडत् । ह्रौडते । इति दुर्गादासः ॥

ह्लग, म ए संवरणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) म, ह्लगयति अह्लगीत् । इति दुर्गादासः ॥

ह्लप, क भाषणे । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् ।) क, ह्लापयति । रेफयुक्तादिरित्येके । ह्रापयति । अन्तःस्थतृतीययुक्तः कण्ठ्यवर्गाद्यादिरिति दुर्गसिंहादयः । क्लापयति अचिक्लपत् । भाषणं कथनम् । इति दुर्गादासः ॥

ह्लस, रवे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-अक०-सेट् ।) ह्लसति । इति दुर्गादासः ॥

ह्लाद, ई ङ मोदने । स्वने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-मोदने सक०-सेट् । निष्ठायामनिट् ।) मोदनं हृष्टीकरणं हृष्टीभावश्च । ई, ह्लन्नः । ङ, ह्लादते चन्दनो गात्रम् । बलात् प्रह्लादते मनः । इति किराते । इति दुर्गादासः

ह्लादः, पुं, (ह्लाद + घञ् ।) आह्लादः । इति हेमचन्द्रः ॥ ( यथा, मार्कण्डेये । १५ । ५३ ।
"ततस्तद्गात्रसंसर्गी पवनो ह्लाददायकः ।
पापकर्म्मकृतो राजन् ! यातना न प्रबाधते ॥"
हिरण्यकशिपोः पुत्रभेदः । यथा, विष्णुपुराणे । १ । १५ । १४२ ।
"अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव बुद्धिमान् ।
संह्लादश्च महावीर्य्या दैत्यवंशविवर्द्धनाः ॥")

ह्लादिनी, स्त्री, (ह्रादिनी रलयोरैक्यात् रस्य लः ।) विद्युत् । वज्रम् । इत्यमरः । २ । ४ । १२४ ॥ (ह्लादयते इति । ह्लादि + णिनि । ङीप् ।) शक्तिविशेषः । यथा,—
"ह्लादिन्या सम्बिदाश्लिष्टः सच्चिदानन्द ईश्वरः ।
स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः ॥"
इति श्रीभागवते ७।१।७ टीकायां श्रीधरस्वामी ॥

ह्लीका, स्त्री, ( ह्री लज्जायाम् + "ह्रियोरश्च लो वा ।" उणा० ३।४८। इति कन् । पक्षे रस्य लः ।) लज्जा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

ह्लीकुः, स्त्री, (ह्री + "ह्रियः कुक् रश्च लो वा ।" इति कुक् पक्षे रस्य लः ।) ह्रीकुः । इत्युणादिकोषः ॥

ह्लीकुः, पुं, ( ह्री + कुक् । रस्य लः ।) जतु त्रपु । इत्युणादिकोषः ॥

ह्लेषा, स्त्री, ( ह्रेषः । रस्य लः । ) ह्रेषा । इत्यमरटीकायां नीलकण्ठः ॥

ह्वल, म चाले । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) म, प्रह्वलयति । मित्वेऽप्यस्य ज्वी ज्वलह्वल इत्यादिना केवलस्य ह्रस्वविकल्पनात सोपसर्गस्य नित्यं ह्रस्वः । ह्वलयति ह्वालयति । चालश्चलनम् । इति दुर्गादासः ॥

ह्वृ, कौटिल्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट् ।) ह्वरति लतां वायुः । इति दुर्गादासः ॥

ह्वे, ञ ऐ स्पर्द्धे । शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-शब्दे अक०-स्पर्द्धे-सक०-अनिट् ।) स्पर्द्धः पराभिभवेच्छा । इति वोपदेवः ॥ ञ, ह्वयति ह्वयते मल्लो मल्लमभिभवितुमिच्छति । ह्वयति जनं लोकः । आह्वयतीत्यर्थः । ऐ ह्वयात् । गोविन्दभट्टस्तु स्पर्द्धाविषये व्यक्तवाक्येऽयमित्याह । इति दुर्गादासः ॥

---

## ऌ

ऌ, शेषऌकारः । गौड़देशे अस्याकारोच्चारणयोर्भेदो नास्ति । किन्त्वस्याध एकबिन्दुमात्रंचिह्नं क्रियते । वेदे अस्य उच्चारणस्थानं जिह्वामूलम् । देवनागरवर्णमालायां अस्याकारः एवं प्रकारः ऌ । अस्य प्रयगः । अग्निमीऌे । हे इन्द्र वीऌु चित् । इत्यादि ऋग्वेदः ॥ *॥ तन्त्रे वर्णमालाजपे अस्य प्रयोजनम् । यथा,—
"अनुलोमविलोमेन कॢप्तया वर्णमालया ।
आदिऌान्त ऌादि भान्तक्रमेण परमेश्वरि ! ।
ऌकारं मेरुरूपञ्च लङ्घयेन्न कदाचन ॥"
इति मुण्डमालातन्त्रम् ॥

मातृकान्यासेऽपि अस्य प्रयोजनम् । तत्प्रमाणं मातृकाशब्दे द्रष्टव्यम् ॥*॥ तस्य नामानि यथा,
"ऌः पृथ्वी विमला मेघो अनन्तोऽव्ययहासिता ।
व्यापिनी शिवदा केतुर्ज्जगत्सारतरं हठः ॥
श्रीमृड़ानी च वेदार्थसारो नारायणः स्वयम् ।
जठरो नकुलिः पीता शिवेशोऽनङ्गमालिनी ॥"
इति श्रीनन्दनभट्टाचार्य्यविरचितवर्णाभिधानम् ॥
अपि च ।
"ऌकारो विमलो जीवः शिवभूमिर्व्वरानने ! ॥"
इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम् ॥

कोषः श्रीवरदाप्रसादवसुना श्रीशब्दकल्पद्रुमो यश्च श्रीहरिपूर्व्वकेण चरणेनाकल्पितो यत्नतः ।
सोऽयं कोविदवारिदैर्बहुगुणैः संसेचितः सन्ततं सन्तोषं नयतु क्षितौ बुधगणान् पेयूषगर्भैः फलैः ॥
रसेन्दुनागोडुपतिप्रमाणे शाके शुभेऽस्मिन् भगवत्प्रसादात् ।
नीतः समाप्तिं बहुलप्रयासैः स शब्दकल्पद्रुम एष कोषः ॥

---

**समाप्तोऽयं शब्दकल्पद्रुमः ।**

*Skylark Printers*

PHOTO - LITHO GRAPHER

K 2/8 MODEL TOWN DELHI - 9

Universität zu Köln
Seminar für Indologie